योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः ५९

एकोनषष्टितमः सर्गः ५९

श्रीवसिष्ठ उवाच ।

इत्युक्त्वा भगवानेनं सुरघुं रघुनन्दन ।

ययौ स्वमेव रुचिरं माण्डव्यो मौनमण्डलम् ।। १

गते वरमुनौ राजा गत्वैकान्तमनिन्दितम् ।

धिया संचिन्तयामास को नामाहमिति स्वयम् ।। २

नाहं मेरुर्न मे मेरुर्जगन्नाहं न मे जगत् ।

नाहं शैला न मे शैला धरा नाहं न मे धरा ।। ३

किरातमण्डलं नेदं मम नाहं च मण्डलम् ।

निजसंकेतमात्रेण केवलं देश एव मे ।। ४

त्यक्तो मयैष संकेतो नाहं देशो न वैष मे ।

इदानीं नगरं शिष्टमेष एवात्र निश्चयः ।। ५

पताकावनपङ्क्त्याढ्या भृत्योपवनसंकुला ।

गजाश्वसामन्तयुता पुरी नाहं न मे पुरी ।। ६

व्यर्थसंकेतसंबन्धं संकेतविगमे क्षतम् ।

भोगवृन्दं कलत्रं च नाहं नैतन्ममाखिलम् ।। ७

एवं सभृत्यं सबलं सवाहनपुरान्तरम् ।

नाहं राज्यं न मे राज्यं संकेतो ह्ययमाकुलः ।। ८

देहमात्रमहं मन्ये हस्तपादादिसंयुतम् ।

तदिदं तावदाश्वन्तरलमालोकयाम्यहम् ।। ९

तदत्र तावन्मांसास्थि नाहमेतदचेतनम् ।

न चैतन्मम संश्लेषमेत्यब्जस्य यथा जलम् ।। १०

मांसं जडं न तदहं नैवाहं रक्तमप्यलम् ।

जडान्यस्थीनि नैवाहं न चैतानि मम क्वचित् ।। ११

कर्मेन्द्रियाणि नैवाहं न च कर्मेन्द्रियाणि मे ।

जडं यत्किल देहेऽस्मिंस्तदहं नैव चेतनः ।। १२

नाहं भोगा न मे भोगा न मे बुद्धीन्द्रियाणि च ।

जडान्यसत्स्वरूपाणि न च बुद्धीन्द्रियाण्यहम् ।। १३

मूलं संसृतिदोषस्य मनो नाहं जडं हि तत् ।

अथ बुद्धिरहंकार इति दृष्टिर्मनोमयी ।। १४

मनोबुद्धीन्द्रियाद्यन्तो भूतकोशश्चलद्वपुः ।

नाहमेवं शरीरादि शिष्टमालोकयाम्यहम् ।। १५

शेषस्तु चेतनो जीवः स चेच्चेत्येन चेतति ।

अन्येन बोध्यमानोऽसौ नात्मतत्त्ववपुर्भवेत् ।। १६

एवं त्यजामि संवेद्यं चेत्यं नाहं हि तत्किल ।

शेषो विकल्परहितो विशुद्धचिदहंस्थितः ।। १७

चित्रमेषोऽस्मि लब्धात्मा जातः कालेन कार्यवान् ।

एष सोऽहमनन्तात्मा नान्तोऽस्य परमात्मनः ।। १८

ब्रह्मणीन्द्रे यमे वायौ सर्वभूतगणे तथा ।

स एष भगवानात्मा तन्तुर्मुक्तास्विव स्थितः ।। १९

चिच्छक्तिरमला सैषा चेत्यामयविवर्जिता ।

भरिताशेषदिक्कुञ्जा भैरवाकारधारिणी ।। २०

सर्वभावगता सूक्ष्मा भावाभावविवर्जिता ।

आब्रह्मभुवनान्तःस्था सर्वशक्तिसमुद्गिका ।। २१

सर्वसौन्दर्यसुभगा सर्वप्राकाश्यदीपिका ।

सर्वसंसारमुक्तानां तन्तुराततरूपिणी ।। २२

सर्वाकारविकाराढ्या सर्वाकारविवर्जिता ।

सर्वभूतौघतां याता सर्वदा सर्वतां गता ।। २३

चतुर्दशविधान्येषा भूतानि भुवनोदरे ।

एतन्मयीयं कलना जागती वेदनात्मिका ।। २४

मिथ्यावभासमात्रं तु सुखदुःखदशागतिः ।

नानाकारमयाभासः सर्वमात्मैव चित्परा ।। २५

सोऽयमात्मा मम व्यापी सेयं यदवबोधनम् ।

सेयमाकलिताङ्गाभा करोति नृपविभ्रमम् ।। २६

अस्या एव प्रसादेन मनो देहरथे स्थितम् ।

संसारजाललीलासु याति वल्गति नृत्यति ।। २७

इदं मनःशरीरादि न किंचिदपि वस्तुतः ।

नष्टे न किंचिदप्यस्मिन्परिनश्यति पेलवे ।। २८

जगज्जालमयं नृत्तमिदं चित्तनटैस्ततम् ।

एतयैवैकया बुद्ध्या दृश्यते दीपलेखया ।। २९

कष्टं मुधैव मे चिन्ता निग्रहानुग्रहस्थितौ ।

बभूव देहनिष्ठेह न किंचिदपि देहकम् ।। ३०

अहो त्वहं प्रबुद्धोऽस्मि गतं दुर्दर्शनं मम ।

दृष्टं द्रष्टव्यमखिलं प्राप्तं प्राप्यमिदं मया ।। ३१

सर्वं किंचिदिदं दृश्यं दृश्यते यज्जगद्गतम् ।

चिन्निष्पन्दांशमात्रांशान्नान्यत्किंचन शाश्वतम् ।। ३२

क्व तौ कीदृग्विधौ वापि किंनिष्ठौ वा किमात्मकौ ।

निग्रहानुग्रहौ लोके हर्षामर्षक्रमौ तथा ।। ३३

किं सुखं किं नु वा दुःखं सर्वं ब्रह्मेदमाततम् ।

अहमासं मुधा मूढो दिष्ट्या मूढोऽस्म्यहं स्थितः ।। ३४

किमस्मिन्नेवमालोके शोच्यते किं विमुह्यते ।

किं प्रेक्ष्यते किं क्रियते स्थीयते वाथ गम्यते ।। ३५

किंचिदेवमिदं नाम चिदाकाशे विराजते ।

नमो नमस्ते निस्तत्त्व दिष्ट्या दृष्टोऽसि सुन्दर ।। ३६

अहो नु संप्रबुद्धोऽस्मि सम्यग्ज्ञातमलं मया ।

नमो मह्यमनन्ताय सम्यग्ज्ञानोदयाय च ।। ३७

विगतरञ्जननिर्विषयस्थिति-

र्गतभवभ्रमरञ्जितवर्जिते ।

स्थिरसुषुप्तकलाभिगतस्ततः

समसमं निवसाम्यहमात्मनि ।। ३८

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषूपशमप्रकरणे सुरहवृ० सुरघुविश्रान्तिर्नामैकोनषष्टितमः सर्गः ।। ५९ ।।